**मदनचतुर्दशी** स्त्री मदनपूजार्थां चतुर्दशी शा॰त॰। चैत्रशुक्लचतुर्दश्याम् तत्र दमनकेन मदनपूजाविहितेति तस्यास्तथात्वम्। ति॰त॰ दृश्यम्।

**मदनत्रयोदशी** स्त्री मदनपूजार्थां त्रयोदशी। चैत्रशुक्लत्रयोदश्याम् ति॰त॰दृश्यम्। [मत्स्यपु॰७अ॰

**मदनद्वादशी** स्त्री मदनपूजार्थां द्वादशी। चैत्रशुक्लद्वादश्याम्

**मदनपक्षिन्** पु॰ माद्यति मद-ल्यु कर्म॰। खञ्जनखगे शब्दच॰

**मदनपाठक** पु॰ मदनोद्दीपनार्थं पठति पठ-ण्वुल्। स्मरोद्दीपनशब्दकारके कोकिले राजनि॰।

**मदनमोहन** पु॰ मदनमपि मोहयति सौन्दर्येण मुह-णिच् ल्यु। श्रीकृष्णे।

**मदनललिता** स्त्री "वेदाङ्गाऽङ्कैर्मदनललिता मो भो नम लगाः" वृ॰र॰ टीकोक्ते षोड़शाक्षरपादके छन्दोभेदे।

**मदनलेख** पु॰ मदनज्ञापनार्थं लेखः। स्वकीयानुरागज्ञापनार्थे नायकयोः परस्परं प्रति प्रेष्ये लेखे पत्रभेदे। यथा शकुन्तलायाम् "तुज्झ ण आणे हिअअम्" इत्यादि।

**मदनबीज** न॰ तन्त्रोक्ते (क्लीम्) इति बीजे

**मदनशलाका** स्त्री मदनोद्दीपिका शलाका तथाभूत शलाकेव वा। १स्मरोद्दीपकौषधे २सारसखगे मेदि॰ ३कोकिले शब्दर॰।

**मदनसदन** न॰ ६त॰। १स्त्रीचिह्नभेदे। ज्योतिषोक्ते लग्नावधिके २सप्तमे स्थाने च।

**मदनसारिका** स्त्री मदनोद्दीपिका सारिका शा॰त॰। (सालिक) पक्षिभेदे जटा॰। [धान्यभेदे राजनि॰।

**मदनाग्रक** पु॰ मदनं मादकमग्रमस्य कप्। कोद्रवे (कोदो)

**मदनाङ्कुश** पु॰ मदनस्याङ्कुश इव। १पुरुषचिह्ने लिङ्गे त्रिका॰ २मैथुनकाले नखाघाते च।

**मदनायुध** न॰ ६त॰। स्त्रीचिह्ने शब्दच॰। [राजनि॰।

**मदनायुष** पु॰ मदनस्यायुर्यत्र अच्समा॰। क्षुद्रिकरक्षुपभेदे

**मदनालय** पु॰ ६त॰। २स्त्रीचिह्ने ज्योतिषोक्ते लग्नावधिके सप्तमस्थाने मदनभवनादयोऽप्यत्र।

**मदनावस्था** स्त्री मदनकृतावस्था शा॰त॰। कामिनां स्मरकृते उन्मादादौ दशाभेदे दशाशब्दे दृश्यम्।

**मदनी** स्त्री माद्यत्यनया मद-ल्युट् ङीप्। १सुरायाम् हारा॰ २मृगनाभौ ३अतिमुक्तके च राजनि॰।

**मदनेच्छाफल** पु॰ मदनेच्छां फलति फल-अच् ६त॰। बहुरसाले राजनि॰।

**मदनोत्सव** पु॰ मदननिमित्त उत्सवः। १होलाकोत्सवे उज्ज्व॰। २स्वर्वेश्यायाम् स्त्री शब्दर॰।

**मदप्रयोग** पु॰ ६त॰। गजानां मदोद्गमे त्रिका॰। [शब्दच॰।

**मदभञ्जिनी** स्त्री मदं भनक्ति भञ्ज-णिनि। शतमूल्याम्

**मदयन्ती** स्त्री मद-णिच्-शतृ गौरा॰ ङीष्। वनमल्लिकायाम् (काठमल्लिका) राजनि॰। स्वार्थे क ह्रस्वः। मदयन्तिका तत्रैवार्थे शब्दरत्ना॰।

**मदयित्नु** पु॰ मद-णिच्-इत्नुच्। १कामदेवे २मेघे ३शौण्डिके च मेदि॰। ४मद्ये न॰ शब्दर॰। ५मादके त्रि॰ त्रिका॰।

**मदलेखा** स्त्री "मसौ गः स्यात् मदलेखा" वृ॰र॰उक्ते सप्ताक्षरपादके १छन्दोभेदे ६त॰। २गजानां दानवारिपङ्क्तौ

**मदविक्षिप्त** पु॰ ३त॰, १मत्तगजे शब्दच॰। २मदेन क्षिप्ते त्रि॰।

**मदशाक** पु॰ मदार्थं शाकमस्य। उपोदक्यां शब्दच॰।

**मदसार** पु॰ मदं सारयति गमयति सृ-णिच्-अण् उप॰स॰। तूलवृक्षे राजनि॰।

**मदस्थल** पु॰ ६त॰। १सुरापाने शब्दरत्ना॰। मदस्थानादयोऽप्यत्र। ज्योतिषोक्ते लग्नावधिके २सप्तमस्थाने च।

**मदहस्तिनी** स्त्री मदेन हस्तिनीव। महाकरञ्जवृक्षे राजनि॰

**मदहेतु** पु॰ ६त॰। १मत्तताहेतौ २धातक्यां वैद्यकम्।

**मदाघ** पु॰ ऋषिभेदे ततः। उपका॰ गोत्रप्रत्ययस्य द्वन्द्वे च अद्वन्द्वे च लुक्।

**मदाढ्य** पु॰ मदेन मदकारणेन (ताड़ि) रसेनाढ्यः। १तालवृक्षे राजनि॰। २रक्तझिण्ट्याम् स्त्री शब्दच॰। ३मदयुक्ते त्रि॰।

**मदातङ्क** पु॰ ६त॰। मदनजरोगभेदे राजनि॰।

**मदात्यय** पु॰ ६त॰। मदनिमित्ते रोगभेदे तस्य निदानादि गरु॰पु॰ १६॰ अ॰ उक्तं दृश्यम्। भावप्र॰ उक्तन्तु यथा "विषस्य ये गुणा दृष्टाः सन्निपातप्रकोपनाः। त एव मद्ये दृश्यन्ते विषे तु बलवत्तराः। तस्मादविधिपीतेन तथा मात्राधिकेन च। युक्तेन चाहितैरन्नैरकाले सेवितेन च। मद्येन खलु जायन्ते मदात्ययमुखा गदाः"। अविधिप्रयुक्तं मद्यं विकारान्तरमप्युत्पादयतीत्याह। "निर्भक्तमेकान्तत एव मद्यं निषेव्यमाणं मनुजेन नित्यम्। उत्पादयेत् कष्टतमान् विकारानुत्पादयेच्चापि शरीरभेदम्"। एकान्ततो नैरन्तर्येण, विकारान् मदात्ययादीन्। शरीरस्य भेदं नाशम्। मदात्ययादीनां हेत्वन्तरमप्याह "क्रुद्धेन भीतेन पिपासितेन शोकाभितप्तेन बुभुक्षितेन। व्यायामभाराध्वपरिक्षतेन वेगावरोधाभिहतेन वापि। अत्यम्लभक्षावततोदरेण सा-